HSS Kavitharachana

माता शद्विति

Code No: 12

# बाष्पार्चितम् मातृविलापम्

हा ! प्रस्रवति अम्बाया: नयनात् निकामं
आसीत् सा पाटलतनु: बालिका ननु सूनं
कल्हारपुष्पमिव मञ्जुलं नयनद्वयम्
मृदुलाधर: कोकनदमिव अतिमोहनम् ।

सर्वखेलप्रिया सर्वमेलप्रिया बालिका
अधुनापि पीडा मातृहृदये सा शारिका
भजति मुहुर्मुहु: पुत्रीनामं सकामं माता
मातृविरहे वर्षति सार्धं प्रकृतिमाता ।

प्रचण्डवातसङ्कुलं सार्थं शरार्द्रं
पतन्ति अश्रूणि चिताम्बरात् हा ! शीघ्रं
मुरजध्वनि सर्वत्र वर्षाघनानाम्
मनीषिन् ! प्रकृतिमातु: बाष्पमिदम् ।

अनृत्यत् पुत्री धृत्वा क्षौमं नूतनरुचिरं
अगायत् कोकिलानन्दकूजनमिव रम्यं
शद्विति स्मृत्य तस्या: सौगन्धिकान्विता बाल्यं
सा माता, पुत्रीमरणस्मरणा नु कठोरं ।

गगने मन्दहासभूषिता शशिकला
मायादर्शनेन आननमाच्छादयति
तव मातृहृदये विलापमदृश्यमानं
हे मात ! निश्वासयति नु मुखमाच्छादयति ।

आमोददायिनी रसिकविलासिनी
सोमकले मात ! नमोस्तुते सदाहं
न भवेत् नव रोदनसम्मिश्रमिदं
वायु श्वसनयोग्यं किन्तु सर्पविषं ।

नूतनजाज्वल्यकिरणौर्गुम्फित दीप्त्या
भाति सुमुखे च स्फटिकनिर्मलबाष्पं
कृशतनु माता रोदिति कर्णकठोरं
प्रतिफलति प्रकृतिमाता विलापमिदं ।